# महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः
## संस्कृतविभागः

M.Phil./Ph.D. (CORE PAPER) IN SANSKRIT

**पाठ्यशीर्षकम् –** पाण्डुलिपिविज्ञानं समीक्षात्मकग्रन्थसम्पादनञ्च
(MANUSCRIPTOLOGY & CRITICAL TEXT-EDITING)

**पाठ्यकूटसङ्केतः –** SNKT5002

**विषयः –** समीक्षात्मकग्रन्थसम्पादनप्रविधिः
**TOPIC-** (METHODOLOGY OF CRITICAL-EDITING)

**अध्यापकः –** डा. अनिलप्रतापगिरिः

# समीक्षात्मकग्रन्थसम्पादनप्रविधिः
# (Methodology of critical text editing)

1. उपोद्घातः
2. समीक्षात्मकग्रन्थसम्पादनस्य स्वरूपम्
3. समीक्षात्मकग्रन्थसम्पादनप्रविधेः स्वरूपम्
4. समीक्षात्मकग्रन्थसम्पादनप्रविधेः प्रक्रिया
5. समीक्षात्मकग्रन्थसम्पादनप्रविधेः प्रयोजनम्

# 1.उपोद्घातः(Introduction)

समीक्षात्मकग्रन्थसम्पादनप्रविधिना पाण्डुलिपिग्रन्थेषु विद्यमानानां लिपिकारकृत-दोषाणां दूरीकरणम्, मूलपाण्डुलिपिग्रन्थस्य अन्वेषणम्, पाण्डुलिपिमातृकायाःअध्ययनञ्च भवति। प्रायः भिन्नदेशकाललिप्यन्तरणादिवशात् मूलपाण्डुलिपीनां प्रतिलिपिषु विकृतयः सञ्जाताः।येन पाण्डुलिपिग्रन्थस्यार्थावबोधने भ्रमोत्पत्तिः। लिपिकारस्य (Of Scribe) अज्ञानप्रमादादिवशात् मूलपाण्डुलिपिग्रन्थात् प्रतिलिपिनिर्माणे नाना त्रुटयः सञ्जाताः। तासां त्रुटीनां परिहारं विना पाण्डुलिपिग्रन्थनिष्ठविषयस्य सम्यगवबोधनं न सम्भवति। सम्पादनप्रविधया मूलपाण्डुलिपिः या विशुद्धास्ति। तस्याः अन्वेषणमपि सम्भवति। अतएव मातृकायाः शुद्धपाठनिर्णयार्थम्, मूलपाठार्थम्, मूल्याङ्कनार्थं च समीक्षात्मकग्रन्थसम्पादनप्रविधिविषयकज्ञानस्यावश्यकता अपेक्षिता वर्तते।

## शुद्धप्रतिलिपिनिर्माणे कारणद्वयम्

- लिपिसौष्ठवम्
- लिपिकारस्य नैपुण्यम्

**लिपिसौष्ठवम्**

समशीर्षाण्यक्षराणि वर्तुलानि घनानि च।
परस्परमलग्नानि यो लिखेत्स हि लेखकः॥

समानि समशीर्षाणि वर्तुलानि घनानि च।
मात्रासु प्रतिबद्धानि यो जानाति स लेखकः॥

शीर्षोपेतान् सुसम्पूर्णान् शुभश्रेणिगतान् शुभान्।
अक्षरान् वै लिखेद्यस्तु लेखकस्स वरः स्मृतः॥

# लिपिकारस्य नैपुण्यम्

## मत्स्यपुराणे लिपिकारः

### लिपिकारस्य व्यावहारिकगुणानां निरूपणम्

सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः।
लेखकः कथितो राज्ञः सर्वाधिकरणेषु वै॥

शीर्षोपेतान् सुसम्पूर्णान् शुभश्रेणिगतान् समान्।
अक्षरान्वै लिखेद्यस्तु लेखकस्स वरः स्मृतः॥

उपायवाक्यकुशलः सर्वशास्त्रविशारदः।
बह्वर्थवक्ता चाल्पेन लेखकः स्यान्नृपोत्तम॥

नानाऽभिप्रायतत्त्वज्ञो देशकालविभागवित्।
अनाहार्यो नृपे भक्तो लेखकः स्यान्नृपोत्तम॥

## गरुडपुराणे लिपिकारः

### लिपिकारस्य चारित्रिकगुणानां निरूपणम्

मेधावी वाक्पटु प्राज्ञः सत्यवादी जितेन्द्रियः।
सर्वशास्त्रसमालोकी ह्येष साधुस्सलेखकः॥

# 2.समीक्षात्मकग्रन्थसम्पादनस्य स्वरूपम्

1. सम्पादनशब्दस्य व्युत्पत्तिलभ्यार्थः
2. समीक्षात्मकग्रन्थसम्पादनस्य लक्षणम्
3. समीक्षात्मकग्रन्थसम्पादनस्य सिद्धान्तः
   (क) तुलनात्मकपाठनिर्धारणसिद्धान्तः
   (ख) शास्त्रीयपाठनिर्धारणसिद्धान्तः

# सम्पादनशब्दस्य व्युत्पत्तिलभ्यार्थः

व्याकरणसन्दर्भे सम्पादनम्

पाण्डुलिपिविद्यायाः सन्दर्भे सम्पादनम्

सम्+पद्+णिच्+ल्युट्=सम्पादनम् (करणम्)
सम्+पद्+णिच्+ण्वुल्=सम्पादकः (कर्ता)
सम्+पद्+णिच्+क्त=सम्पादितः(सम्पादनेन निष्पन्नः)
सम्+पद्+णिच्+ण्वुल्+छ=सम्पादकीयः(सम्पादकसम्बन्धितः)

अत्र सम्पादनं व्यापारः।सम्पादनेन निष्पन्नं फलं सम्पादितम्।यःसम्पादनं करोति स सम्पादकः।सम्पादकसम्पादितयोर्मध्ये कार्यकारणभावसम्बन्धः।सम्पादकः सम्पादनव्यापारेण सम्पादितरूपं कार्यं निष्पादयति इत्यर्थः। सम्पादितरूपकार्यस्य सम्पादकेन सह सम्बन्धनिदर्शनार्थं सम्पादकीय शब्दस्यापि प्रयोगः क्रियते।

# पाण्डुलिपिविद्यायाः सन्दर्भे सम्पादनम्

पाण्डुलिपिमातृकायाः शुद्धपाठनिर्णयस्य कृते मूलमातृकायाः अन्वेषणस्य कृते च सम्पादकस्य समस्ताः प्रयत्नाः व्यापारो वा सम्पादनं भवति।यद्यपि सम्पादनस्य आत्मा शुद्दपाठनिर्णय एव।परन्तु क्वचित्तु शुद्दपाठनिर्णयेन सह मातृकायाःविमर्शात्मिकमध्ययनमपि समीक्षात्मकसम्पादनस्य मूलम्। अतएव समीक्षणप्रविधना समानविषयात्मकेभ्यः संगृहीतेभ्यः पाण्डुलिपिग्रन्थेभ्यः मूलपाठप्रदर्शनपुरस्सरं शुद्धपाठनिर्णयार्थम् अध्ययनार्थञ्च समस्तं विधानं सम्पादनं भवति।

# समीक्षात्मकसम्पादनस्य लक्षणम्

आदाय कमपि ग्रन्थं मुद्रितं वा कराङ्कितम्।
अव्यवस्थितमालोक्य तदुद्धारसमीहया॥1॥
तस्यानेकाः प्रतीर्लब्ध्वा सर्वाः सम्यङ्-निरीक्ष्य च।
तासु सर्वाङ्गशुद्धा या प्रतिः प्रामाणिकी भवेत्॥2॥
तामेव प्रमुखीकृत्य पाठान्तरपुरस्सरम्।
पादट्टिपणसङ्केतैः प्रकाशार्हा विधीयते॥3॥
आदौ ग्रन्थस्य कर्तुश्च परिचयोऽप्यत्र दीयते।
एतत्सम्पादनं प्रोक्तं कर्ता सम्पादको मतः॥4॥
-प्रो. रहसविहारीद्विवेदी

(उद्धृतम्-शोधप्रविधि एवं पाण्डुलिपिविज्ञान, पृ-66)

# समीक्षात्मकग्रन्थसम्पादनस्य सिद्धान्तः

## तुलनात्मकपाठनिर्धारणसिद्धान्तः

सम्पादकः एकस्याः मातृकायाः नैकाः प्रतिलिपिमातृकाः संगृह्य तासां परिवर्तनीयांशनां(पाठभेदानां) तुलनात्मकसमीक्षणेन युक्तियुक्त-शुद्धपाठनिर्णयस्य मीमांसां करोति॥

## शास्त्रीयपाठनिर्धारणसिद्धान्तः

सम्पादकः एकस्याः मातृकायाः परिवर्तनीयांशेषु (पाठभेदेषु) साम्यं वैषम्यं च समीक्ष्य प्रतिलिपिमातृकाणां मध्ये पौर्वापर्यम् अभिलक्ष्य वंशवृक्षनिर्माणं (Genealogical Table) कृत्वा युक्तियुक्तशुद्धपाठनिर्णयस्य मीमांसां करोति॥

# समीक्षात्मकग्रन्थसम्पादनप्रविधेः स्वरूपम्

- मूलपाठान्वेषणम्
  - वंशवृक्षनिर्माणेन टीका-भाष्यादिद्वारा च मूलपाठान्वेषणं सम्भवति।
- शुद्धपाठनिर्धारणम्
  - वंशवृक्षनिर्माणेन,टीकाभाष्यादिद्वारा तुलनात्मकसमीक्षणेन च शुद्धपाठनिर्धारणं सम्भवति।


# वंशवृक्षनिर्माणस्य प्रविधिः (Methodology of preparation of family tree/ pedigree chart/ genealogical table)

वंशवृक्षनिर्माणस्य उदाहरणरूपेण एकस्याः पद्धतेः निरूपणम्

यथा सुभाषितसङ्ग्रहः इति ग्रन्थस्य सप्तप्रतिलिपयः समुपलभ्यन्ते। एताः प्रतिलिपयः परस्परं प्रतिलिपयः न सन्ति। एतासु प्रतिलिपिषु पाठभेदाः अधोलिधिताः –

1. सन्तुष्टाश्च महीभृतः। (क तथा घ प्रतिलिप्योः पाठभेदः)
2. सन्तुष्टाः पृथिवीभूजः। (ख तथा छ प्रतिलिप्योः पाठभेदः)
3. सन्तुष्टाश्च महीपतिः। (ग तथा च प्रतिलिप्योः पाठभेदः)
4. सन्तुष्टाश्चैव पार्थिवः। (ङ प्रतिलिपेः पाठभेदः)

उपर्युक्तैः पाठभेदैः कल्पयते यत् क तथा घ अनुपलब्ध- A- प्रतिलिपेः प्रतिलिपी, ख तथा छ B-प्रतिलिपेः प्रतिलिपी, ग तथा च C -प्रतिलिपेः प्रतिलिपी। A,B,C प्रतिलिपयः अपि अनुमानिताः। अतएव एतासां मूलप्रतिः X भवितुं शक्यते। एतासां प्रतिलिपीनां वंशवृक्षः अधोलिखितः-




निर्देशः – *अनुमानिता प्रतिलिपिः

# 4.समीक्षात्मकग्रन्थसम्पादनप्रविधेः प्रक्रिया

1. सामग्रीसङ्कलनम्
2. पाठचयनम्
3. पाठसंशोधनम्
4. विचारविश्लेषणम्
5. मुद्रणसंशोधनस्य प्रविधिः

# सामग्रीसङ्कलनम्

समीक्षात्मकग्रन्थसम्पादनस्य कृते सर्वप्रथमं सम्पादकः गवेषकः वा मातृकाणां सङ्ग्रहणं कुर्यात्।एताःमातृकाःप्रायःपाण्डुलिपिग्रन्थालयेषु,शिक्षणसंस्थानस्य पुस्तकालयेषु,मठमन्दिरेषु,प्राचीनपण्डितानां गृहेषु,सम्भ्रान्तपरिवारेषु च समुपलभ्यन्ते। एकस्य विषयस्योपरि सङ्गृहीतासु मातुकासु प्रत्येकं मातृकां कूटात्मकं नामकरणं करणीयम्। मातृकायाः कूटात्मकं प्रतीकमेव आङ्गलभाषायां Siglum कथ्यते।यथा- देवनागरीलिप्यात्मिकायाः मातृकायाः कृते (D) इति कूटसङ्केतम्, ग्रन्थलिप्यात्मिकायाः मातृकायाः कृते (G), उडियालिप्यात्मिकायाः कृते (O)- इत्यनेन प्रकारेण नैकविधानि कूटसङ्केतात्मकानि नामकरणानि करणीयानि।

# पाठचयनम्

नैकाः मातृकाः सङ्गृह्य तासां तुलनात्मकं गम्भीरमध्ययनं कृत्वा विवेकशक्त्या अत्यन्तं विश्वसनीयं पाठचयनं करणीयम्।पाठचयनोपरान्तं सम्पादनप्रपत्रे मातृकाविषयकपाठभेदाः उल्लेखनीयाः।

# पाठसंशोधनम्

मातृकासु प्रक्षिप्तपाठ्यांशस्य बहिष्करणं कृत्वा युक्तियुक्तपाठानां समीक्षकमतानुसारं संयोजनं पाठसंशोधनं भवति। मातृकासम्पादने मातृकायां विवर्तस्य प्रबलसम्भावनात्वात् पाठसंशोधनम् अपवाददशायामेव करणीयम्।

# विचारविश्लेषणम्

पाठसमीक्षायां सम्पूर्णमातृकायाः सन्दर्भे युक्तियुक्तसमग्रचिन्तनं क्रियते यथा- मातृकानिष्ठविषयाः, विषयाणां मूलं, मातृकायाः भाषा-शैली-देशकालादिविचाराः, मातृकाकर्त्तुः व्यक्तित्वं कर्तृत्वञ्च इत्यादीनां विमर्शः क्रियते। अयं विमर्शः पाण्डुलिपिविज्ञाने उच्चतरमालोचनारूपेण प्रसिद्धः।

मुद्रणसंशोधनस्य प्रविधिः

मुद्रणसंशोधनविषयकाः सङ्केताः  निम्नलिखिताः

d/ - अनावश्यकं पदमिदं / अक्षरं / चिह्नं निष्कासय

ﺡ/ - निष्कास्य मेलयतु ।

⌒/ - मेलयतु ।

# - पृथक्करोतु ।

ㄈ/ - वामतः स्थापयतु ।

ㄱ/ - दक्षिणतः स्थापयतु ।

2/ - निरन्तरं चलतु । नूतनः अनुच्छेदः नास्ति ।

6/ - N. P. / अत्र नूतनः अनुच्छेदः अस्ति ।

= - अक्षराणि समानाकारकाणि भवन्तु ।

II - पङ्क्तिः समाना भवतु ।

∠∠ - रेखाङ्कितं भागं वक्राक्षरैः ( *Italic* ) स्थापय

∠ - शब्दानां मध्ये यथायोग्यं शून्यस्थानं ( Space )

≠ - शून्यस्थानं ( Space ) न्यूनीकरोतु ।


≠≠ - शून्यस्थानं ( Space ) वर्द्धयतु ।

;∠ - अर्द्धविरामचिह्नं योजयतु ।

( )∠ - कोष्ठकं योजयतु ।

⊙∠ - विसर्गं योजयतु ।

⊙∠ - विरामचिह्नं योजयतु ।



- विस्मयादिबोधकं योजयतु ।
- समासचिह्नं स्थापयतु ।
- अधः स्थापयतु ।
- उपरि स्थापयतु ।
- स्थूलाक्षरैः परिवर्त्तयतु ।
- सूक्ष्माक्षरैः परिवर्त्तयतु ।
- प्रश्नवाचकचिह्नं व्यवहरतु ।
- मूलपाण्डुलिपिं पश्यतु ।

Source: Methodology of Research in Sanskrit, p.p.64-65 by Dr.Satyanarayana Acharya,Tirupati

## Recommended readings & References:


1. Murthy,Srimannarayana,Methodology in Ideological Research, Delhi:Bharatiya Vidya Prakashan,1990.
2. Murthy,R.S.Shivaganesh,Introduction to Manuscriptology,Sharada Publication House,Delhi-110035,1996.
3. Katre,S.M.(with P.K.Gode),Introduction to Indain Textual riticism,Poona:Deccan College,1954.
4. Thaker,Jayant P., Manuscriptology and Text Criticism, Oriental Institute, Baroda.
5. Pandurangi,K.T.Wealth of Sanskrit Manuscripts in India & Abroad,Bangalore.
6. Buhler G, Indian Paleography, Munshiram Manoharam lal, New Delhi.
7. शोधप्रविधि एवं पाण्डुलिपि विज्ञान,अभिराज राजेन्द्र मिश्र,अक्षयवट प्रकाशन,इलाहाबाद ।
8. पाण्डुलिपि विज्ञान,सत्येन्द्र,राजस्थान हिन्दी ग्रन्थ अकादमी,जयपुर ।
9. भारतीय पाण्डुलिपि विज्ञान,कुमुदिनी पाण्डेय,महावीर प्रेस,वाराणसी ।
10. .भारतीय प्राचीन लिपिमाला,गौरीशङ्कर ओझा,मुन्शीराम मनोहरलाल,वाराणसी ।
11. भारतीय पुरालिपि विद्या,दिनेश चन्द्र सरकार,विद्यानिधि प्रकाशन दिल्ली ।
12. तत्त्वबोध)सम्पा,(.दीप्ति त्रिपाठी ,राष्ट्रीय पाण्डुलिपि मिशन ,दिल्ली ।
13. विश्व के प्राचीन संस्कृत अभिलेख,लक्ष्मी विलास पार्थसारथी,वाणीविलास प्रकाशन,ऋषिकेश ।
14. संस्कृतशोधप्रविधिः(Methodology of Research in Sanskrit),डॉ.सत्यनारायण आचार्यः,श्रीमती सौदामिनी त्रिपाठी),प्रकाशिका,(पुरी,ओडिशा,पुनर्मुद्रणं-2012.

For

Queries

Questions

Comments

Suggestions

Contact:
Dr.ANIL PRATAP GIRI
ASSOCIATE PROFESSOR
DEPARETMENT OF SANSKRIT
MAHATMA GANDHI CENTRAL UNIVERSITY
MOB.7200526855
Email:anilpratapgiri@mgcub.ac.in

# धन्यवादाः